# ॥ श्रीहैमशब्दानुशासनम् (बृहद्वृत्तिः) लघुन्याससहितम् ॥

॥ अर्हं ॥ ॥ प्रणम्य परमात्मानं श्रेयः शब्दानुशासनम् ॥ आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित्प्रकाश्यते ॥ १ ॥ अर्हं । १ । १ । १ ॥ अर्हमित्येतदक्ष- कव-

अर्हं ॥ प्रणम्य केवलालोकावलोकितजगत्त्रयम् ॥ जिनेशं श्रीसिद्धहेमचन्द्रशब्दानुशासने ॥ १ ॥ शब्दनित्यानित्यं नन्दोदयचन्द्रोपदेशतः ॥ न्यासतः कतिचिद् दुर्गपदव्याख्याभिधीयते ॥ २ ॥ इह नि शेषशेमुषीसमुन्मेषनिर्मितानेकविद्वज्जनमनश्चमत्कारकारिशास्त्रनिकरविस्मापितविशदप्रज्ञाधर्महर्षिकानेकसूरिः निष्प्रतिमप्रतिभाप्रभारापहस्तितत्रिदशसूरिः श्रीकुमारपालक्ष्मापालप्रतिबोधविधानविहितनिखिलक्षोणिमण्डलाभयप्रदानप्रभृतिसंख्यातिक्रान्तप्रभावनानिर्माणस्मृतिगोचरसञ्चरिष्णूकृतचिरतनवैरस्वाम्यादिप्रवरसूरिः सुगृहीतनामधेयः श्रीहेमचन्द्रसूरिर्निखिलजडिमग्रस्तं मनस्तमपि विश्वमवलोक्य तदनुकम्पापरीतचेताः शब्दानुशासनं कर्तुकामः प्रथमं मङ्गलार्थमभिधेयादिप्रतिपादनार्थं चेष्टदेवतानमस्कारमाह—प्रणम्येति ॥ ननु प्रयोगोऽयं भावे कर्मणि वा । उच्यते । भाव एव । तर्हि कथं परमात्मानमिति कर्म । उच्यते । 'सकर्मकाणामुत्पन्नस्त्याद्विर्भावविवक्षया ॥ अपाकरोति कर्मार्थं स्वभावान्न पुनः कृतः' ॥ १ ॥ नत्वेत्यनेनापि सिध्यति किं प्रकारेण । प्रकारो मानसिकं गीतगति उपहासनमस्कारं च निराकरोति । 'नमस्तं तत्सखि प्रेम वण्टारासितसोदरम् । क्रमक्रशिमनि सारमारम्भगुरडम्बरम् ॥ १ ॥—इत्यादिवत् ॥ परमेति । परमात्मानमित्यत्र 'कर्मणि कृतः' इति षष्ठी प्राप्नोति परं 'तृन्नुदन्त'–इति निषेधः ॥—श्रेय इति 'प्रशस्यस्य श्रः' इति श्रादेशविधानबलात् क्रियाशब्दत्वेनागुणाङ्गादपि प्रशस्यशब्दादीयस् । 'नैकस्वरस्य' इति निषेधात् 'त्र्यन्त्यस्वरादेः' इति नान्त्यस्वरादिलोपः । 'अवर्णेवर्णस्य' इत्यपि न प्रवर्तते । त्र्यन्त्यस्वरादेरनेकस्वरस्य' इत्येकयोगेनैव सिद्धे पृथग्योगकरणमस्यापि बाधनार्थमिति ॥—शब्दानुशासनमिति । अत्र कथं षष्ठीसमासस्तृतीयामीति निषेधात् । सत्यम् । प्रत्यासत्तिन्यायेन यस्य कृत्प्रत्ययस्यापेक्षया षष्ठी यदि तदपेक्षयैव तृतीया स्यात् । अत्र तु प्रकाश्यते इत्यस्यापेक्षया तृतीया अनुशासनं इत्यपेक्षया न षष्ठीति न समा ॥—आचार्येति । आचर्यते सेव्यते विनयार्थिभिरिति ध्यण् १ । आचारे साधु । 'तत्र साधौ' यः २ । आचारान् यातीति, कनिः ३ । आचारानाचष्टे णिज् बहुलम्'—इत्यनेन णिच् । आचारयतीति 'शिक्यास्याढ्य'–इत्यनेन निपात्यते ४ । आचारान् गृह्णाति ग्राहयति वा 'कर्मणोऽण्' पृषोदरादित्वात् साधुः ५ ॥ किमपि चिनोति क्विप्, किमः सर्वविभक्त्यन्तात् 'चित्चनौ' इति वा किञ्चिदिति । अखण्डमव्ययं वा ॥ मौलोऽर्थः प्रतीत एव ॥ अथ पूर्वार्धमावृत्त्या व्याख्यायते । परम् आत्मानं च प्रणम्य प्रह्वीकृत्य सावधानीकृत्येति योगः । किंविशिष्टं परम्, श्रेयः शब्दाननुशासयति श्रेयः शब्दानुशासनस्तम् । किंविशिष्टं चात्मानम्, श्रेयः शब्दाननुशास्ति श्रेयः शब्दानुशासनस्तम् । उभयत्र 'रम्यादिभ्यः' इत्यनट् ॥ पूर्वं तावद्वौद्धोक्ता अतिशयाः कथ्यन्ते । परमात्मानमित्यनेन स्वार्थसंपत्तिः स्वार्थसंपत्त्युपायलक्षणश्च द्वौ, श्रेयःशब्दानुशासनमित्यनेन परार्थसंपत्तिः परार्थसंपत्त्युपायलक्षणश्च द्वौ लभ्येते । एवं सर्वदर्शनानुयायित्वेनातिशया भावनीयाः । अत्र च नमस्कारे चतुस्त्रिंशदतिशयसंग्राहकातिशयचतुष्टयमध्ये कः केन पदेनोच्यते सूच्यते वा इत्यभिधीयते । परमात्मानमित्यनेन पूजातिशयः । अत एव 'सन्महत्परम'–इत्यनेन पूजायां समासः । द्वितीयपाठेन वचनातिशयः श्रेयांश्च ३ एकशेषे श्रेयांसः, ते च ते शब्दाश्च ताननुशास्तीति व्युत्पत्तेर्वचनातिशयः । वचनातिशयश्च न ज्ञानातिशयं विनेति वचनातिशयेन ज्ञानातिशय आक्षिप्यते । ज्ञानातिशयश्च नापायापगमातिशयं विनेति तेनापायापगमातिशयाक्षेपः । अपायभूता हि रागादयस्तेषामपगमः स एवातिशय इति ॥—अर्हमिति । अर्हति पूजामित्यर्हन्... पृषोदरादित्वात्.. नुनासिक-